International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(4): 44-45
© 2015 IJSR
www.sanskritjournal.com
Received: 06-04-2015
Accepted: 30-04-2015

**डॉ उमेशशुक्लः**
व्याख्याता व्याकरणविभागस्य
श्रीमती–लाडदेवीशर्मा पंचोली आदर्श
संस्कृत महाविद्यालय बरुन्दनी
माण्डलगढ़ भीलवाड़ा राजस्थान

**Correspondence**
**डॉ उमेशशुक्लः**
व्याख्याता व्याकरणविभागस्य
श्रीमती–लाडदेवीशर्मा पंचोली आदर्श
संस्कृत महाविद्यालय बरुन्दनी
माण्डलगढ़ भीलवाड़ा राजस्थानै

# नामार्थ विचारः

## डॉ उमेशशुक्लः

**नामार्थ विचारः**
सर्वप्रथमं नामशब्दस्य का आवश्यकता अस्य विषयोपरि चर्चा क्रियते। नाम (प्रातिपदिकः) संज्ञा (दवनद ) शब्दस्य अर्थः कथ्यते। संज्ञा बोधकशास्त्रं नाम कथ्यते। भारतस्य बहिः पाश्चात्य देशेषु इदं व्याकरणस्य ( संस्कृतम् ) नेम (दंउम)रूपे सुरक्षितोऽस्ति। वैदेशिकाः संस्कृतभाषायाः मौलिकतायां रक्षां कुर्वन्ति। एतस्मै संज्ञा शब्दान् नामेति कथ्यते यत् अयं धातु शब्दानां व्यपारार्थं प्रति नमनं करोति। ''नमति स्वार्थं विशेषणीकरोति धात्वर्थं प्रतीति नामोच्यते'' व्याकरणस्य सिद्धान्तात् व्यापारक्रियाप्रधान–नामार्थं च तेषु विशेषणं भूत्वा शाब्दबोधे उच्चरितं भवन्ति। अतः संज्ञाबोधकनामशब्दः वैयाकरणमतानामनुकूलं भावार्थं प्रगटं करोति। सूत्रकारः पाणिनिः पदार्थं दृष्ट्वा नामान्तरशब्दं प्रातिपदिकशब्देन व्यवह्रियते। (प्रतिपदमर्हतीति प्रातिपदिकम्) नम्धातोः नामशब्दमपि प्रातिपदिकं कथ्यते।
नामार्थस्य विवेचनं क्रियते–
व्याकरणशास्त्रे जाति, व्यक्ति, लिंग, संख्या, कारकाणि च। एषु पंचानामर्थानां नामार्थं कथ्यते। एषु 1–केवलं जाति, 2–जातिव्यक्तिश्च, 3– जाति–व्यक्ति–लिंगं च, 4–जाति–व्यक्ति–लिंग–संख्या च, 5– जाति–व्यक्ति–लिंग–संख्या–कारकश्च नामार्थः कथ्यते। अनेन प्रकारेण पंच नामार्थाः भवन्ति। अनेन प्रकारेण वैयाकरणातिरिक्तः अन्येऽपि स्वीकुर्वन्ति। वैयाकरणभूषणसारकारः कौण्डभट्टः लिखति–

**एकं द्विकं त्रिकं चाथ चतुश्कं पंचकं तथा।**
**नामार्थम् इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः।।**
**व्याकरणसूत्रानुसारेण पंचानां नामार्थानां समर्थनं करोति–**

**1– 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्'(पा0 सू0 1/12/58 )**
एकोप्यर्थो वा बहुवद् भवति। ब्राह्मणाः पूज्याः। ब्राह्मणः पूज्यः। जात्याख्यायाम्–आकृत्यधिकरणन्यायेन घटादि शब्दानां जातिवाचकत्वात् जातेः च एकत्वाद् एकवचनमेव स्यादित्यारम्भः। जातिशब्दे एकत्वे बहुवचनं वा स्यादित्यक्षरार्थः। तथा सति ब्राह्मणाः भोज्याः इत्यादौ विशेषणान्न स्यादित्याशंक्य एकस्मिन्नर्थे विद्यमानः शब्दः विद्यमानः एकः बहुनर्थान् वक्तिः, एकार्थो बहुवद्भवति इति लभ्यते इत्यभिप्रेत्याह–एकोप्यर्थ इति।बहुत्व प्रयुक्तं कार्यं लभत इत्यर्थः।

**2– क सरूपाणमेकशेष एकविभक्तौ (पा0 सू0 1/2/64 )**
एक विभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते। एकविभक्ताविति सरूपाणामित्यत्रान्वेति। समानं रूपं येषां तानि सरूपाणि। एकस्यां विभक्तौ परतः सरूपाणामेव दृष्टानां मध्ये एकः शिष्यत इत्यर्थः।

**ख– अणुदित् सवर्णस्य चाप्रत्ययः (पा0 सू0 1/1/69)**
प्रतीयते विधीयते इति प्रत्ययः।

**3– ह्रस्वो नपुंसके प्रातिपदिकस्य (पा0 सू01/2/47)**
क्लीबे प्रातिपदिकस्याजन्तस्य ह्रस्वः स्यात्।

**4–द्व्येकयोर्द्विवचनैकवचने :– पा0 सू0 1/4/22)**
दित्वैकत्वयोरेते स्तः।

**5– कर्मणि द्वितीया 2/3/2।।**
अनुक्ते कर्मणि द्वितीया स्यात्। हरिं भजति। अभिहिते तु कर्मणि 'प्रातिपदिकार्थ मात्रे' इति प्रथमैव। अभिधानं तु प्रायेण तिङ्कृत तद्धितसमासैः। तिङ्–हरि सेव्यते । कृत्–लक्ष्म्या सेवितः। तद्धितः–शतेन क्रीतः शत्यः। समासः–प्राप्तः आनन्दो यं स प्राप्तानन्दः। क्वचिन्निपातेनाऽभिधानम्। यथाविषवृक्षोऽपि संवर्ध्य स्वयं छेतुमसाम्प्रतम्। साम्प्रतमित्यस्य हि युज्यते इत्यर्थः।।
कर्तृकरणयोस्तृतीया 2/3/18/
अनभिहिते कर्तरि करणे च तृतीया स्यात्।रामेण बाणेन हतो बाली।
चतुर्थी सम्प्रदाने 2/3/13/
सम्प्रदाने चतुर्थी स्यात्। विप्राय गां ददाति। अनभिहित इत्येव। दानीयो विप्रः।
अपादने पंचमी' /2/3/28।।
ग्रामादायाति। धावतोऽश्वात् पतति। 'कारकम्' किम्? वृक्षस्य पर्णं पतति।
षष्ठी शेषे /2/3/50।।
कारक प्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषस्तत्र षष्ठी स्यात् । राज्ञः पुरूषः। कर्मादीनामपि सम्बन्ध मात्रविवक्षायां षष्ठ्येव, सतां गतम्। सर्पिषो जानीते। मातुः स्मरति। एधोदकस्योपस्कुरूते। भजेः शम्भोश्चरणयोः। फलानां तृप्तः ।
."सप्तम्यधिकरणे च" /2/3/36
अधिकरणे सप्तमी स्यात्। चकाराद् दूरान्तिकार्थेभ्यः। औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा। कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छास्ति। सर्वस्मिन्नात्मास्ति वनस्य दूरे अन्तिके वा। "दूरान्तिकार्थेभ्य– इति विभक्तित्रयेण सह चतस्त्रोऽत्र विभक्तयः फलिताः।
उक्तानि यानि सूत्राणि सन्ति तानि सर्वाणि सूत्राणि प्रातिपदिकार्थः नामार्थ पदेनोच्यते।
जातिव्यक्तिपक्षे नामार्थविचारः
पंचविंशति कारिकायाम् "एकं" पदमुच्यते। अनेन पदेन जाति गृह्यते। शक्तिग्राहकशिरोमणिना व्यवहारेण व्यक्तावेव तत्परिच्छेदात् कथं जातौ तत्सिद्धिरत आह–अनेकव्यक्तीनामिति। पूर्वव्यवहारेण व्यक्तौ शक्तिग्रहेप्यानन्त्यात् तावतीषु शक्तिग्रहासम्भवात्तत् तदाश्रयभेदभिन्ननाना शक्तिकल्पने गौरवात् पश्चात् जातौ एव निर्द्धार्यते इत्यर्थः।
एकव्यक्तिविषयकशक्तिज्ञानाद् अपरव्यक्तिविषयकशाब्दबोधाभ्युपगमे तु गोव्यक्तिविषयकशक्तिज्ञानाद् अश्वविषयकबोधापत्या तद्व्यक्ति विषयकशक्तिज्ञानस्य तद् व्यक्तिविषयकबोधे हेतुताया कल्प्यतयैकविषयकज्ञानाद् अपरव्यक्तिबोधानुदयापत्या सकलव्यक्तिभानार्थं तावद् व्यक्तिषु शक्तिकल्पनायां गौरवस्य स्फुटतया शक्तिकल्पनोचिता।
यद्यपि गौर्गोपदवाच्यः इति शक्तिग्रहो व्यक्तिविषयकोपि, तथापि सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्यवोध इति न्यायेन जातावेव सत्तां परिच्छिनत्ति। यद् वा जातिविशेष्यक एव शक्तिग्रहः 'गौर्गोपदशक्यः इति जातिशक्तिवाद एवमेवाभिलाषत्।
तथाहि जातिशक्तिवादे गोत्वादिपदात् तद् विशिष्टवोधापत्तिः, शक्तिग्रहस्य तद् विशिष्टवोधौपयिकस्य सत्वात्। न च निर्धमितावच्छेदकशक्तिग्रहो गोत्वविशिष्टबोधे हेतुर्गोत्वत्वधर्मितावच्छेदकशक्तिग्रहश्च गोत्वत्वेन तदुपस्थितौ शाब्दवोधे च हेतुरितिवाच्यम्, गोत्वं न गोपदशक्यमिति गोत्वत्वधर्मिता–वच्छेदकवाधग्रहकाले निर्धमितावच्छेकशक्तिग्रहसम्भवेन गोत्वविशिष्टवोधापत्या गोत्वत्वधर्मितावच्छेदकशक्तिग्रहस्य तादृशवोधहेतुतया आवश्यकत्वात्।
यदि च गोत्वेनिरवच्छिन्नैव शक्तिः– गोपदं गौरित्याकारकं शक्तिसम्बन्धेन गोत्वप्रकारकं गोपदत्वविशिष्टविषयकं शक्तिज्ञानं गोत्वविशिष्टवोधहेतुरिति नोक्तबोधकाले शाब्दवोधापत्तिरिति। विभाव्यते, तथापि कदाचित् कालिकादिसम्बन्धेनेति व्यवस्थानुपपत्तिः, गोत्वविषयकशक्तिज्ञानस्य अविशिष्टत्वात्। वैयाकरणमते तु समवायेन गोत्वविशिष्टविषयकशाब्दवुद्धिं प्रति, तेन सम्बन्धेन गोत्वविशिष्टशक्तिग्रहस्य, एवम् इतरसम्बन्धेन तादृशविशिष्टविषयकबोध तेन सम्बन्धेन तादृशविशिष्टशक्तिज्ञानस्य हेतुतया तन्नियमोपपत्तेः। गोपदं गौरित्याकारकप्रकारो भावप्रत्ययविधानात् गवेतरासमवेतत्वविशिष्टसकलगोसमवेतत्त्वरूपस्य गुरोः शक्यत्वाभ्युपगमे, लाघवमूलकाकृतिवादस्य मूलशैथिल्यापत्तेश्च।
नन्वेवं गां दद्यात्, ब्रीहीनवहन्ति इत्यादौ दानावहननकर्मत्वाद्यन्वयानुपपत्तिः जातेस्तदन्वयायोग्यत्वादिति चेदत्र केचित्–जात्याक्षिप्तव्यक्तावेव दानादिकर्मत्वान्वय इति तन्न, प्रत्ययानाम्, इति व्युत्पत्तेः अर्थप्रकृत्यर्थव्यक्तौ तदन्वयासम्भवात्। वैयाकरणभूषणसारकार उकतम्–

**गम्यमानस्य चार्थस्य नैव दृष्टं विशेषणम्।**
**शब्दान्तरैर्विभक्त्या वा धूमोयं ज्वलतीतिवत्।।इति।।**

किंचायमाक्षेपोर्थापत्तिः, समानसंवित्संवेद्यत्वं वा? नाद्यः,अनुपपत्तिमन्तरेणापि गौरस्ति इत्यतो गोत्वविशिष्टबोधात्। नान्त्यः,जातिविषयकशक्तिग्रहस्य विशिष्टविषयकबोधहेतुत्वाभ्युपगमेन जातिविषयताया व्यक्तिविषयतानैयत्यरूपोवाच्यः अन्यस्यासम्भवात्। स च 'गोत्वमस्ति, इत्यत्र गोत्वविशिष्टाप्रत्ययाद्।
त्रिकमिति–त्रयाणाम् अर्थानां समूहः–जाति–व्याक्ति–लिंगंच। ये त्रयाणाम् अर्थानामेव नामार्थोच्यते। वैयाकरणभूषणसारकार मते– सत्व– रज–तम्। एभिः माध्यमेन त्रयाणां लिंगानां निर्धारणं करोति। यस्मिन् द्रव्ये सत्वरजतमोगुणानां साम्यावस्था वर्तते स नपुंसकं भवति।यस्मिन् द्रव्ये सत्वरजतमोगुणानाम् आधिक्यं वर्तते स पुंलिंगो भवति। यस्मिन् द्रव्ये सत्वरजतमोगुणानां अपचयः वर्तते स स्त्रीलिंगो भवति। भगवान् पाणिनिः सूत्रमाध्यमेन पुंलिंगनपुंसकलिंगस्य व्यवहारं कृतः। पुल्लिंगः शब्द इति व्यवहारात् तस्माच्छसो नः पुंसि /6/1/103।। नपुंसकलिंगः शब्द इति व्यवहारात् स्वमोर्नपुंसकात्/7/1/23।। इत्यादि सूत्रप्रमाण्याच्चेति भावः। वस्तुतः तेषां विरुद्धत्वेपि शब्दानां समानानुपूर्वीकत्वनिबन्धनाभेदाध्यासाद् अनेकलिगंकत्वव्यवहारोप–पत्तिरित्यर्थः वैयाकरणसिद्धान्तकोमुद्यामुक्तम्–

**स्तनकेशवति स्त्री स्यल्लोमशः पुरुषः स्मृतः।**
**उभयो अन्तरतं येन भावेन तद् नपुंसकम्।।**

इत्यादि स्मृतिलक्षितं लिंगं तु नात्राश्रयितुं शक्यम्, इत्यादौ शस्प्रकृत्यर्थे नत्वाद्यनापत्तेः। तथा च भाष्ये उक्तम्– एकार्थशब्दान्यत्वाद् दृष्टं लिंगान्यत्वमवयवान्यत्वाच्च इति । एकस्मिन्नर्थे पुष्यः, तारका, नक्षत्रम् इति लिंगनानात्वदर्शनात्, कुटीरः इत्यादौ रेफस्यावयवस्योपजनत्वेपि लिंगभेददर्शनाच्चान्यवदेव शब्दनिष्ठं लिंगमिति तदर्थः अर्थनिष्ठतवे तु पुंलिंगः शब्दः' इतिसमानाधिकरण्यानुपपत्तिश्चेति भावः। इति शम्।